अष्टादश शक्तिपीठ स्तोत्रं

अष्टादश शक्तिपीठ स्तोत्रं

लंकायां शांकरी देवी कामाक्षी कांचिकापुरे |
प्रद्युम्ने शृंखलादेवी चामुंडी क्रौंचपट्टणे ||

अलंपुरे जोगुलांबा श्रीशैले भ्रमरांबिका |
कोल्हापुरे महालक्ष्मी माहूर्ये एकवीरिका ||

उज्जयिन्यां महाकाली पीठिक्यां पुरुहूतिका |
ओढ्यायां गिरिजादेवी माणिक्या दक्षवाटके ||

हरिक्षेत्रे कामरूपा प्रयागे माधवेश्वरी |
ज्वालायां वैष्णवी देवी गया मांगल्यगौरिका ||

वारणस्यां विशालाक्षी काश्मीरेषु सरस्वती |
अष्टादश सुपीठानि योगिनामपि दुर्लभं ||

सायंकाले पठेन्नित्यं सर्वशत्रुविनाशनं |
सर्वरोगहरं दिव्यं सर्वसंपत्करं शुभं ||

इति अष्टादश शक्तिपीठ स्तुतिः